Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2023 GISRRJ | Volume 6 | Issue 4 | ISSN : 2582-0095

# स्वरस्वतीतीर्थविरचितायाः किरातार्जुनीयस्य बालबोधिनी टीकायाः अलङ्कारः अध्ययनम्

Biplab Manna
Research Scholar, Dept. - Sahitya (R.P), National Sanskrit University, Tirupati.

**Article Info**
Volume 6, Issue 4
Page Number : 60-67
**Publication Issue :**
July-August-2023
**Article History**
Accepted : 01 July 2023
Published : 15 July 2023

**शोधसारांशः-** किरातार्जुनीयम् हि भारवेः सर्वविधलक्षणोपेतं महाकाव्यम्। अत्र हि सन्ति अष्टदशसर्गाः सम्प्रति समुपलब्धा। महाभारतस्य वनपर्वाणि समुल्लिखितम् अर्जुनस्य पाशुपतास्त्रप्राप्तिवृत्तान्तमादाय निवद्धमिदं महाकाव्यं भावपक्षापेक्षया कलापक्षमेव समधिकं पुष्णाति। काव्येऽस्मिन्वनेचरमुखात्दुर्योधनशासन- वृत्तान्तवर्णनं द्रौपदीवाक्यं, भीमगर्जनं, युधिष्ठिरस्य नीतियुक्तवचनम्, अर्जुनप्रस्थानसमये द्रौपदीवाक्यं, शरद्वर्णनं, हिमालयवर्णनम्, गन्धर्वाप्सरसांविलालवर्णनं, उद्यानजलक्रीडा सायंचन्द्रोदयसुरतप्राभातादि - वर्णनं, शिवार्जनयोः युद्धवर्णनं च उत्तरोन्तरम् उत्कर्षं जनयति।

**मुख्यशब्दाः-** किरातार्जुनीयम्, बालबोधिनी, टीका, अलङ्कारः, महाभारतः, महाकाव्यम्।

**शब्दालङ्काराणां विवेचना-** चमत्कारजनकत्वे सति शब्दपरिवृत्त्वसहत्वं शब्दालङ्कारः। अलङ्कारशास्त्रे अलङ्काराणां शब्दगतत्वेन अर्थगतत्वेन शब्दार्थोभयगतत्वेन च व्यवस्थितेः अन्वयव्यतिरेकयोः अनुविधायकत्वेन निर्णयः। यमकादयः पञ्चषाः प्रधानाः शब्दाऽलङ्काराः अत्र अन्तर्भवन्ति। भरतमुनिना “यमकालङ्कारः" एक एव शब्दालङ्कारत्वेन निर्दिश्यते। बहुभिः आलङ्कारिकैः सर्वप्रथमम् अनुप्रासालङ्कारः विवेच्यते। भरतमुनिदर्शितक्रमानुसारं तत्परवर्तिभिः दण्डिप्रभृतिभिः दर्शितरीत्या च यमकालङ्कारप्रयोगः अत्र विवेच्यते।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**यमकम्-** सार्थकस्य निरर्थकस्य वा भिन्नार्थयुक्तस्य स्वरव्यञ्जनसमुदायस्य आवृत्तिः यमकम्। अत्र सार्थकानां निरर्थकानां च वर्णनामावृत्तिर्भवति। अर्थात् सर्वेऽपि वर्णसमुदायाः सार्थकाः भवेयुरिति नियमोऽत्र नास्ति ।

भरतेन शब्दाभ्यासः यमकमिति निरूपितम्, पदादिषु विकल्पेनेति च। यथा **शब्दाभ्यासस्तु यमकं पदादिषु विकल्पितम्**[1] इति।

इत्थमेव यमकस्य प्रारम्भः शब्दाभ्यासेन जातः। भरतमते यमकं नाम केवलं शब्दानामावृत्तिरेव भवति। अन्येषां यमकलक्षणानामाविष्कारः कालेन जात इति मन्तुं शक्यते ।

भामस्य मते भिन्नार्थयुक्तानां पदानां तुल्यश्रुतिवर्णानामावृत्तिरेव यमकं भवति। तद्यथा-

**तुल्यश्रुतीनां भिन्नानामभिधेयैः परस्परम् ।**
**वर्णानां यः पुनर्वादो यमकं तन्निगद्यते ।।**[2]

अस्य मते यमके निबद्धानां पदनां सन्धिः सुश्लिष्टः स्यात्, किञ्च तत्र प्रसादगुणसम्पन्नता सुखोच्चार्यता च स्यात्। यथा

**प्रतीतशब्दमोजस्ति सुश्लिष्टपदसन्धि च ।**
**प्रसादस्वाभिधानं च यमकं कृतिनां मतम्।।**[3] **इति।**

इत्थं बहवः आलङ्कारिकाः यमकालङ्कारस्योपरि बहुधा उक्तवन्तः। एतादृशः यमकालङ्कारम् अस्यां **किरातार्जुनीयसुखबोधिनीटीकायां** देवराजभट्टः पञ्चदशसर्गे चिन्तनपूर्वकं प्रदर्शितवान्। तत्र दिङ्मात्रमुदाहरणं यथा -

**मा विहासिष्ट समरम्** इत्यस्मिन् श्लोके मध्ययमकस्य विषये एवं सूचितमस्ति। तद्यथा "प्राकृतैरिवेति जहातेर्लुङि मध्यमपुरुषबहुवचने यमस्मेत्यादिना इभसकि सनिविहासिष्टेति रूपम्। मध्ययमकम्।"

**स्यन्दना नो चतुरगाः**[4] इत्यस्मिन् पद्ये "तथाविधाः पत्तयस्तुरगरक्षिणो येषामिति च तुरगविशेषणमिति"। अर्धावृत्तिस्समुद्गः स्यादित्युक्तत्वात्समुद्गयमकम्।"

---

1.ना.शा. 16.59

2.का. अ.2.17

3.का. अ.2.18

4.किरा. 15.8

**तेन व्यातेनिरे भीमा**[5] इत्यस्मिन् पद्ये "तथा विधान्याननानि मुखानि येषां शराणांते तथा शिखा धरा मयूखास्तेभ्यो जातानि यानि पिञ्छानि तान्येव वासांसि वाजा येषां ते शिखाभरणवाससः । शृङ्खलायमकः ।"

**घनं विदार्यार्जुन** [6] इत्यस्मिन् पद्ये "स तथा लोचन: दुर्विभाव्यस्येत्यर्थः। किरातवेषसंञ्छादिततत्वम्। समुद्रयमकम् ।"

**विकासमीयुर्जगतीश** [7] इत्यस्मिन् श्लोके "धार्मिकाणां धार्मिकविषयस्येष्टत्वात्। एकाकारचतुष्पादं महायमकमुच्यते।"

इत्थमयं व्याख्याकारो देवराजः सविमर्शं यमकालङ्कारम् अचिन्तयत्।

**अलङ्काराणां विवेचना-** व्याख्यानमिदम् अलङ्काराणां विश्लेषणं, पद्यगतानाम् अलङ्काराणां काव्यार्थसौन्दर्यं च सुष्ठु प्रख्यापयति। तत्र प्रधानाः अलङ्काराः। तादृशानाम् अलङ्काराणां विश्लेषणम् अधः प्रस्तूयते।

अलक्रियते अनेनेति करणार्थे घञ् प्रत्यये अलङ्कारशब्दो निष्पद्यते। संस्कृतवाङ्मये अलङ्काराणामतीव महत्त्वपूर्णं स्थानं विद्यते। यथा - कटककुण्डलग्रैवेयकादीनि स्त्रीणाम् अलङ्करणानि भवन्ति तथा काव्यस्य उपमादयः काव्यस्य सौन्दर्यवर्धकाः भवन्ति। एवं विधौ विशिष्टा दृष्टिः प्रदत्ता। अलङ्कारस्वरूपनिरूपणे तेन विविधानामालङ्कारिकाणां मतान्युल्लिखितानि। पद्धतिरियं **देवराजटीकायाः** समुत्कर्षं द्योतयति। तत्र दिङ्मात्रमलङ्काराणामुदाहरणानि यथा -

1.**वनान्तशय्याकठिन**[8] इत्यादिश्लोकस्य टीकायां "वनान्तेत्येवमादावन्तश्शब्दोऽलङ्कारार्थः। यथा गन्धमादनवनान्तवायवः" इति ।

2. **मदसिक्तमुखैर्मृगाधिपः** [9] इत्यस्मिन् पद्ये "अप्रस्तुतसिंहप्रशंसया प्रस्तुतार्थसूचनात्। तदार्थान्तरन्यासोऽयं 'लघयन्नि' त्यादि अत्र खलु यस्मादित्यर्थे। इत्यत्र पूर्वत्र वाक्यालङ्कारे" इति।

---

[5].किरा. 15.16

[6].किरा. 15.50

[7].किरा. 15.52

[8].किरा. 1.36

[9].किरा. 2.18

3. **अपनेयमुदेतुमिच्छता**[10] इत्यादि श्लोके - "तथा हि अंशुमता सहस्रांशुनापि पूर्वं प्रभया नैशं तिमिरमविभिद्याविनाश्य नोदीयते। अर्थात् तदुपमानोपमेयभावबोधः" इति।

4. **प्रसादलक्ष्मीं दधतं**[11] इत्यस्मिन् श्लोकव्याख्याने "स्वभावस्यार्द्रता प्रेमवत्त्वम्। यथा माघे आर्द्रता हृदयमाप चेति। कालिदासोऽपि प्रायस्सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा। इति अनेनापि मेघोपमा निरीक्षिता" इति।

5. **निर्याय विद्याथ**[12] इत्यस्मिन् श्लोके "स्फुरत्पद्ममिव। यथा दीप्तिः पद्मं प्रविशति तद्वदित्यर्थः ।वाक्योपमैषा, तेन प्रतिवाक्यमिव शब्दः यथा -

**नलिन्या इव तन्वङ्ग्यास्तस्याः पद्ममिवाननम् ।**
**मया मधुलतेनैव पायं पायमरम्यत।। इति।"**

**6. कृतानतिर्व्याहृत**[13] इत्यस्मिने श्लोके "अत्र सम्प्रदानशब्दो विश्वासपरः। वाक्यशेषे सद्भिस्संयोग एव विश्वासं जनयतीत्युक्तेः। यथाह जैमिनिः - सन्दिग्धे तु वाक्यशेषान्निर्णय" इति।

7.**असंशयालोचितकार्यनुन्नः**[14] इत्यस्मिन् श्लोके "असंभावितोऽपि प्रेमस्वभावमात्रोत्पन्नो न दुःखं पञ्चभिस्सहेति न्यायात् नात्यन्तमपीडयत्। अत्रोत्प्रेक्षा तुल्याद्विभागादिव। भारो हि समभागेन बहूनां विभक्तस्सन् लघीयान् भवति।

8. **स क्षत्रियस्त्राणसहः**[15] इत्यस्मिने श्लोके "इव शब्दोऽवधारणे 'इव सम्भावनायां स्यादुपमानेऽवधारणे' इति निघण्टुः" इति वर्तते ।

9.**विहाय वाञ्छामुदिते**[16] इत्यस्मिन् पद्ये "अमी शालयोनमन्ति । नमनेउत्प्रेक्षामाह।"

10. **प्रबभूव नालमवलोकयितुम्**[17] इत्यस्मिन् पद्ये "तर्हि कथमधिकधृतिबन्धनं तस्य। मदस्तुतिभिर्हेतुभूताभिर्मुदितालियोषितो यत्रेति । अत्रार्थान्तरन्यासः ।"

---

10.किरा. 2.36
11.किरा. 3.2
12.किरा. 3.25
13.किरा. 3.31
14.किरा. 3.33
15.किरा. 3.48
16.किरा. 4.25

**11.सितवाजिने** [18] इत्यस्मिन् पद्ये "तत्प्रभाचित्रितां वीचिं दृष्ट्वा रत्नपटलमत्रावस्थितमित्यर्जुनोऽज्ञासीदित्यर्थः। अत्रोपमानमाह आकृतय इङ्गितानि मुखप्रसादादीनि। तानि मनोगतं स्फुरितं मनसि स्थितं चिकीर्षितं निगदन्ति तद्वदिति" इति।

**12. प्रणिधाय तत्र**[19] इत्यस्मिन् श्लोके "विधिना धियं प्रणिधाय शास्त्रदृष्टेन प्रकारेण चेतसो वृत्तिं निरुध्य मुनितां दधतो मुनिभूतस्य पुरातनमुनेस्सुरावतारस्यार्जुनस्य तत्र पर्वते असुकरं तपः केनापि कर्तुमशक्यं तपःश्रमं नादधौ न क्लममुदपादयत्। अर्थान्तरन्यासः।"

**13.पतितैरपेतजलदान्नभसः** [20] इत्यस्मिन् पद्ये "अपेतजलदात् नभसः अपगतमेघादाकाशात् पतितैरपां पृषितैः करणैः रजश्शमयता तपोवशात्तस्य पवनतेजो नभोभूमिजलकणरूपाणि महाभूतान्यप्येवमाचरन्ति। अत उत्प्रेक्षा।"

14. **महते फलाय**[21] इत्यस्मिन् श्लोके "कथं विस्मयवशं न ययावित्यत्र अर्थान्तरन्यासं न्यस्यति। यस्मात् वशिनां विजितेन्द्रियाणामनुभावगुणस्य प्रभावगुणो धैर्यं न निहन्ति, धीरतां नापयति" इति ।

15. **उत्सृष्टध्वजकुथकण्टका** [22] इत्यस्मिन् पद्ये "कङ्कटास्तनुत्राणि तान्युत्सृष्टानि त्यक्तानि यैस्ते। तदानीमुत्प्रेक्षा ।"

16.**सिन्दूरैःकृतरुचयः** [23] "श्लोके "जलदस्तु वारणानामरुणालोकच्छुरणं सिन्दूराहितशोभायाः शतह्रदा बन्धनकक्ष्यायाः उपमानम्" इति ।

---

[17].किरा. 6.7

[18].किरा. 6.9

[19].किरा. 6.19

[20].किरा.6.27

[21].किरा.6.28

[22].किरा. 7.30

[23].किरा. 8.7

17.**अथ स्वमायाकृतम्** [24] इत्यस्मिन् पद्ये “तथा सनातनं शाश्वतम् इच्छोपनतत्वात्। तत् पुरम्। अथानन्तरम्। सुराङ्गना अप्सरसो वनानां सम्बन्धिन्या विजिहीर्षया विहर्तुमिच्छया जहुः त्यक्तवत्यः।”

18. **निपीयमानस्तबका** [25] इत्यस्मिन् श्लोके “निर्दयपीडिताधरवेदनया विधूतहस्ता वनितेवोत्प्रेक्षितेत्यर्थः ।"

19. **स्वगोचरे सत्यपि** [26] इत्यस्मिन् श्लोके “वामतादुर्लभत्वञ्च स्त्रीणां यच्च निवारणाम्। तदेव पञ्चबाणस्य मन्ये परममायुधम् इत्युक्तत्वात् दृष्टान्तेन तमर्थं द्रढयति।"

20. **विधूतकेशाः** [27] इत्यस्मिन् पद्ये “तटनिघर्षणात् कालुष्यमभजत। तदानीमुत्प्रेक्षा।”

21.**विपक्षचित्ते** [28] इत्यस्मिन् पद्ये "जले हृतस्य कुङ्कुमस्य शेषानिव क्वचिदवस्थिता नित्यभिनवोक्तिः ।”

22. **भयादिवाश्लिष्य** [29] इत्यस्मिन् पद्ये "प्रेमा अस्ति चेत् कृत्रिमा अपि चेष्टा इष्टा वस्तुस्वभावः। रसः शृङ्गारः" इति

23. **उदस्य धैर्यं** [30] इत्यस्मिन् पद्ये “दयितेन तस्याः प्रसादितायाः पूर्वं करवारिवारितमतश्च निमीलन्नयनं मुखं सपत्निवदनादिव श्रियं शोभां समाददे। तदा सपन्त्या मुखं विच्छायीभूतम्। अतश्च सपत्निवदनादिवाददं इत्युत्प्रेक्षा ।"

24. **इत्थं विहृत्य** [31] इत्यस्मिन् पद्य “क्रीडित्वोत्तरन्तीनां वनितानां क्षोभादुत्सर्पद्वीचिमाला-लङ्घिततीरं सलिलमग्रे प्रससर्प। तदानीमौत्सुक्यनुन्नमिवेत्युत्प्रेक्षा ।”

25.**गम्यतामुपगते** [32] इत्यस्मिन् पद्य "आसन्नविरहत्वाच्चक्रवाकहृदयानि सन्तप्तानीति वास्तवार्थः । तदानीं भूगतस्तापश्चक्रवाकहृदयान्याविवेशेत्युत्प्रेक्षा ।"

---

[24].किरा. 8.1

[25].किरा. 8.6

[26].किरा.8.13

[27].किरा. 8.33

[28].किरा. 8.35

[29].किरा. 8.44

[30].किरा. 8.50

[31].किरा. 8.55

[32].किरा. 9.4

26. **आस्थितः स्थगितवारिदपङ्क्त्या**[33] इत्यस्मिन् श्लोके “सोर्म्या विद्रुमविभासा रञ्जितस्य विद्रुमवितानविभाः सन्ध्याया उपमानम्।“

27. **लेखया विमलविद्रुमभास**[34] इत्यस्मिन् श्लोके "लेखाया दंष्ट्रा उपमानम्।”

28.**उद्गतेन्दुमपभिन्न** [35] इत्यस्मिन् पद्य “नववधूस्तु व्यंशुकस्फुटमुखी व्यपगतमुखाच्छादनपटुत्वात्। स्फुटदृश्यं मुखं यस्यास्सा। तथा व्रीडया अभिजिह्मा अप्रकाशावयवा। मुखं चन्द्रस्योपमानम्। व्रीडयाऽभिजिह्मत्वं तमिस्रासंश्लेषस्य ।”

29.**पातुमाहितरतीन्यखिलेषु** [36] इत्यस्मिन् पद्ये “युवानो वधूनां वदनानि मधूनि च पातुमभिलेषुः। कीदृशानि तानीति श्लेषेणाह।”

30.**कुसुमनगवनान्युपेतुम्** [37] इत्यस्मिन् पद्ये "प्रथमं चूतेषु ततः पद्मवनेषु तत्सतरुशिखरेष्वाभातीति स्थितिः। तत्रेयमुत्प्रेक्षा।"

31.**चिरमपि कलितान्यपारयन्त्या** [38] इत्यस्मिन् पद्ये "किं मां प्रहिणुयात् । तदेव सर्वं करिष्यतीति नाम शब्द उत्प्रेक्षासूचकः ।"

32.**जटानां कीर्णया केशैः** [39] इत्यस्मिन् श्लोके “इन्दुकरैस्संपृक्तया सन्ध्योपलक्षितोऽहः पर्यन्तादिनाऽन्त इव इन्द्रस्य। तदानीं प्रतीयमानतेजसा अह्नः पर्यन्तेन उपमानम्।”

33.**वपुरिन्द्रियोपतपनेषु**[40] इत्यस्मिन् श्लोके “तेषु वपुरिन्द्रियोपतपनेषु असुखेषु असुखकारिषु तपोऽर्थायासेषु सत्सु पाण्डवस्थिरतानगतापरिमिव व्याप यथागपतिं हिमवन्तं स्थिरता व्याप्नोति। अत्रार्थान्तरन्यासः ।”

34. **तपसा कृतं वपुरुवाहु**[41] इत्यस्मिन् पद्ये "एवं विधं तपोनिर्मितं रूपं प्राप। अत्र विस्मय-मानोऽर्थान्तरन्यास इति।

---

[33].किरा. 9.9

[34].किरा. 9.22

[35].किरा. 9.24

[36].किरा. 9.51

[37].किरा. 10.31

[38].किरा. 10.48

[39].किरा. 11.3

[40].किरा. 12.3

[41].किरा. 12.6

35. **कवचं स बिभ्रदुपवीत**[42] इत्यस्मिन् पद्ये "कवचस्य गहनानि कार्मुकस्येन्द्रचापम्। तस्य च शैलपतिरुपमानम्। विदिद्युत इति दिवी स्वापेः सम्प्रसारणम्।"

36. **दृश्यतामयमनोकहान्तरे** [43] इत्यस्मिन् पद्ये "समयस्सेतुरिव निषेधकत्वात्। तिग्मानामायुधानां भुजङ्गाः, सेनानामूर्मयः, महीपतेरर्णव उपमानम्।"

इत्थं महाकाव्यव्याख्याकर्ता देवराजभट्टः व्याख्यानेऽस्मिन् बहुत्र श्लोकेषु अलङ्काराणां निरूपणं स्पष्टं व्याख्यानं च अकरोत्।

**सहायकग्रन्थसूची**


1. किरातार्जुनीयम् - आचार्यप्रेमकृष्णशास्त्री, चौखाम्बा सुरभारती प्रकाशन्, वाराणसी, 1998
2. अलङ्कारशास्त्रेतिहासः - डॉ. जगदीशतन्द्रमिश्रः, चौखाम्बा सुरभारती प्रकाशन्, वाराणसी, 1999
3. अमरकोशः - भारतीविद्याप्रकाशनम्, नइदिल्ली
4. अष्टाध्यायी (पाणिनिः) - श्री. रा. चन्द्रवासुः, मोतीलालबनारसीदासः, दिल्ली
5. औचित्यविचारचर्चा - क्षेमेन्द्रः, चौखाम्बा औरियण्टाल, वाराणसी
6. किरातार्जुनीयम् - श्रीनिवासशर्मा, भारतीयविद्या प्रकाशन, दिल्ली, 2013
7. किरातार्जुनीयम् - समीरशर्मा, चौखाम्बा विद्याभवन, वाराणसी,2014
8. कविशतकम् - हरेकृष्णशतपथी, उत्कलीयसंस्कृतसोसाइटि, पुरि, ओडिशा
9. काव्यानुशासनम् - हेमचन्द्रः, सर्वश्री चन्द्रालाल वर्धमनषा, वि.पि. भगवत्, मुम्बाइ।
10. किरातार्जुनीयम् - डॉ. सुधाकरमालवीयः, चौखाम्बा कृष्णादास अकादेमी, वाराणसी, 2014
11. दशरूपकम् - धनञ्जयः, डॉ. रामजी उपाध्यायः, भारतीय विद्यासंस्थानम्, वाराणसी
12. साहित्यदर्पणः - डॉ. विमलाकान्तमुख्योपाध्यायः, संस्कृतपुस्तक भाण्डार, कलकाता, 2013


[42].किरा. 12.9

[43].किरा. 13.70